भिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि कुषधातुवत् (233) बोध्यानि। शतरि—[A]तुभ्नन्-ती।

(755) " तुर त्वरणे " (III-जुहोत्यादिः-1102. अक. सेट्. पर.)

छान्दसः।

तोरकः-रिका, तोरकः-रिका, तुतुरिषकः-तुतोरिषकः-षिका, तोतुरकः-रिका; तोरिता-त्री, तोरयिता-त्री, तुतुरिषिता-तुतोरिषिता-त्री, तोतुरिता-त्री; [1]तुतुरत्-ती, तोरयन्-न्ती, तुतुरिषन्-तुतोरिषन्-न्ती; तोरिष्यन्-न्ती-ती, तोरयिष्यन्, तुतुरिषिष्यन्-तुतोरिषिष्यन्-न्ती-ती; तोरयमाणः, तोरयिष्यमाणः, [2]तोतूर्यमाणः, तोतुरिष्यमाणः; [3]प्रतूः-प्रतुरौ-प्रतुरः; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुरधातुवत् (229) बोध्यानि। [4]तुरः[B]। प्रतूर्य।

(756) " तुर्वी हिंसायाम् " (I-भ्वादिः-570-सक. सेट्. पर.)

[5]तूर्वकः-र्विका, तूर्वकः-र्विका, तुतूर्विषकः-षिका, तोतूर्वकः-र्विका; तूर्विता-त्री, तूर्वयिता-त्री, तुतूर्विषिता-त्री, तोतूर्विता-त्री; तूर्वन्-न्ती, तूर्वयन्-न्ती, तुतूर्विषन्-न्ती; — तूर्विष्यन्-न्ती-ती, तूर्वयिष्यन्-न्ती-ती, तुतूर्विषिष्यन्-न्ती-ती; — — तूर्वयमाणः, तूर्वयिष्यमाणः, — तोतूर्व्यमाणः, तोतूर्विष्यमाणः; [6]प्रतूः-प्रतुरौ-प्रतुरः; — — —

---

1. धातोरस्य जुहोत्यादित्वात् 'जुहोत्यादिभ्यः श्लुः' (2-4-75) इति शपः श्लुः। 'श्लौ' (6-1-17) इति द्विर्वचनम्। 'सार्वधातुकमपित्' (1-2-4) इति ङित्त्वाद्वद्भावादङ्गस्य गुणो न। 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुम्निषेधः।
2. 'हलि च' (8-2-77) इति दीर्घः।
3. क्विपि, 'र्वोरुपधाया दीर्घ इकः' (8-2-76) इति दीर्घः। विसर्गः।
4. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कप्रत्ययः।
5. 'उपधायां च' (8-2-78) इति सर्वत्र दीर्घः।
6. 'राल्लोपः' (6-4-21) इति वकारस्य लोपे, 'र्वोरुपधाया दीर्घ इकः' (8-2-76) इति दीर्घे, विसर्गः।

A. 'आधोरणानपि च दन्तवरेण तुभ्नन्
क्लिश्नन् मतिं पलवुरादिकमश्नतां सः।' धा. का. 3.11.

B. 'घर्मोष्मभिस्तत्र समारताग्रे नभस्तुरैस्तैः प्रधने प्रवीणैः॥' धा. का. 2. 55.